# अस्थायि-शिक्षकनियुक्तिः

**राष्ट्रियसंस्कृतसंस्थानम् ( मा.वि. )**
**५६-५७ इन्स्टीट्यूशनल् एरिया**
जनकपुरी, नवदेहली - 110058

## अनौपचारिकसंस्कृतशिक्षणविभागः

| | | |
|---|---|---|
| **आवश्यकता** | - | नवदेहलीस्थ-राष्ट्रियसंस्कृतसंस्थानेन अखिलभारतस्तरे दीक्षापुस्तकाधारेण अनौपचारिकसंस्कृतशिक्षणकेन्द्राणां सञ्चालनं करिष्यते। एतदर्थं देशे यत्र कुत्रापि गत्वा संस्कृतम् अध्यापयितुं संस्कृतशिक्षकाणाम् आवश्यकता वर्तते। |
| **पदनाम** | - | अनौपचारिकसंस्कृतशिक्षकः। |
| **योग्यता** | - | शास्त्री/स्नातकः/शिक्षाशास्त्री/बी.एड./आचार्यः/स्नातकोत्तरः। |
| **वयोमितिः** | - | 40 वर्षाणि (01.03.2020 दिनाङ्के अधिकाधिकम्) पूर्वोत्तरराज्येषु (NER) वयोमितौ विशेषपरिगणना भवितुमर्हति। |
| **अपेक्षितानां संख्या** | - | अस्मिन् (2020-2021) शैक्षिकसत्रे 100 (एकशतम्) शिक्षकाः अपेक्षिताः सन्ति। |
| **कार्यस्वरूपम्** | - | राज्यसंयोजकस्य परामर्शानुसारेण केन्द्रस्य अधिकृताधिकारिणः साहाय्येन च त्रिषु/चतुर्षु स्थानेषु शिक्षकेण संस्कृताध्यापनकक्षा सञ्चालनीया। संस्थानस्य अपेक्षानुगुणं छात्राणाम् आवेदनपत्रादिकं प्रपूर्य संस्थानकार्यालयं प्रति प्रेषणीयम्। अन्यानि च सम्बद्धानि कार्याणि करणीयानि। |
| **कार्यकालः** | - | अस्मिन् शैक्षिकसत्रे जुलाई 2020 तः 15 मई 2021 पर्यन्तं शिक्षकाणां कार्यकालः भविष्यति। तेषां कार्यपरिणामाधारेण अग्रिमशैक्षिकसत्रेऽपि अनुवर्तनार्थं विचारः भवितुमर्हति। |
| **नियोजनप्रकारः** | - | उपरि निर्दिष्टयोग्यतावतां लिखितपरीक्षा मौखिकपरीक्षा च भविष्यतः। उभयविधपरीक्षायाम् (लिखितपरीक्षायां मौखिकपरीक्षायां च) उत्तीर्णेभ्यः प्रशिक्षणं प्रदास्यते। उत्तीर्णैः प्रशिक्षार्थिभिः संस्थानेन आयोजयिष्यमाणे आवासीयप्रशिक्षणवर्गे अनिवार्यतया उपस्थितैः भाव्यम्। प्रशिक्षणोत्तरपरीक्षणे च उत्तीर्णानां वरीयताक्रमेण उपलब्धकेन्द्रसंख्यानुगुणम् अनौपचारिकसंस्कृतशिक्षकत्वेन नियोजनं भवितुमर्हति। चिताः शिक्षकाः संस्थानस्य अपेक्षानुसारेण **कस्मिंश्चिदपि राज्ये** अनौपचारिकसंस्कृतशिक्षणकेन्द्रं प्रति प्रेषयिष्यन्ते। इदं नियोजनं पूर्णतः अस्थायिरूपेण 2020-2021 शैक्षिकसत्रस्य कृते (15 मई 2021 पर्यन्तमेव) भविष्यति। कार्यं सन्तोषजनकं नास्ति चेत् यदाकदापि निष्कासनं भवितुमर्हति। |
| **आवेदनम्** | - | **आवेदनपत्रं** संस्थानस्य जालपुटे वर्तते। तत्प्रपूर्य परीक्षादिने एव लिखितपरीक्षाकेन्द्रे समर्पणीयम्। तत्पूर्वं ई-मेलद्वारा पत्रालयमाध्यमेन वा आवेदनपत्रं नैव प्रेषणीयम्। |
| **पारिश्रमिकराशिः** | - | (निर्धारितकेन्द्रे कार्यारम्भदिनात्) रु.30,000/- (त्रिंशतसहस्रं रूप्यकाणि) प्रतिमासम्। एतदतिरिच्य कार्यस्थले विविधव्ययार्थं रु. 3,000/- (त्रिसहस्रं) प्रतिमासं दास्यते। |
| **परीक्षा** | - | **15.03.2020** दिनाङ्के प्रातः 11:00 (एकादश) वादने लिखितपरीक्षा भविष्यति। परीक्षाकेन्द्रस्य कृते **05 मार्च 2020** दिनाङ्के संस्थानस्य जालपुटं द्रष्टव्यम्। |
| **प्रशिक्षणम्** | - | प्रशिक्षणम् आवासीयं भविष्यति। तच्च जूनमासे (2020) भविष्यति। प्रतिभागिभ्यः आवासभोजनव्यवस्था संस्थानेन प्रशिक्षणस्थाने एव करिष्यते। |
| **प्रशिक्षणस्थानम्** | - | परीक्षणानन्तरं प्रशिक्षणदिनाङ्कः प्रशिक्षणस्थानं च संस्थानस्य जालपुटे **20.05.2020** दिनाङ्के प्रकटयिष्यते। चितेभ्यः ई-मेलद्वारेणापि सूचना दीयेत। |

—♦—

कार्यालयीयोपयोगाय अनुक्रमाङ्कः: ______

स्वप्रमाणितं छायाचित्रम्

# राष्ट्रियसंस्कृतसंस्थानम् ( मानितविश्वविद्यालयः )

56-57, इन्स्टीट्यूशनल एरिया, जनकपुरी, नई दिल्ली- 110 058

## अनौपचारिकसंस्कृतशिक्षणविभागः

## अस्थायि-केन्द्रशिक्षकपदनिमित्तम् आवेदनपत्रम् ( 2020 )

1. नाम : ............................................................

   Name (Capital) ______

2. पितृनाम/पतिनाम : ............................................................

   Father's/Husband's Name ______

3. मातृनाम : ............................................................

   Mother's Name ______

4. जन्मतिथिः (DD/MM/YY) : ........./........./......... आयुः - .........वर्षम् (as on 01 March 2020)

5. स्थाय्यावाससङ्केतः : ............................................................

   ............................................................

   ............................................................

   Permanent Address ______

   पिन कोड ______

6. पत्राचारसङ्केतः : ............................................................

   ............................................................

   ............................................................

   Address for Correspondence ______

   पिन कोड ______

   दूरभाषा ............................ ई-मेल ............................

7. लिङ्गम् : पुरुषः ☐ विवाहितः ☐ अविवाहितः ☐
महिला ☐ विवाहिता ☐ अविवाहिता ☐

8. जातिः : SC ☐ ST ☐ OBC ☐
PH ☐ Gen ☐

9. शैक्षिकयोग्यता : शास्त्री ☐ स्नातकः ☐
शिक्षाशास्त्री ☐ बी. एड्. ☐
आचार्यः ☐ स्नातकोत्तरः ☐

10. राष्ट्रियता : भारतीयः ☐ अन्यः ☐

11. वर्तमानः व्यवसायः {चिह्नितं (✓) करणीयम्} अस्ति ☐ नास्ति ☐
(अस्ति चेत् संस्थानाम पदनामसहितं व्यवसायं सूचयतु) : ..........
..........

12. विशेषः : ..........

13. संस्कृतसम्भाषणवर्गं सञ्चालितवान् चेत् वर्गसङ्ख्या ☐
वर्गस्थानम् : ..........

14. संस्कृतशिबिराणाम् अनौपचारिकसंस्कृतशिक्षणकेन्द्राणां च
आयोजने अनुभवः अस्ति वा ? – आम् ☐ न ☐ अस्ति चेत् सङ्ख्या – ☐

15. संस्थानेन सञ्चालितां प्रथमदीक्षां पाठितवान् उत न?
{चिह्नितं (✓) करणीयम्} – आम् ☐ न ☐ पाठितवान् चेत् सङ्ख्या – ☐

16. अनौपचारिकसंस्कृतशिक्षणकेन्द्रे पाठनार्थम् अनुमतश्चेत्
देशे यत्र कुत्रापि गन्तुं सज्जः अस्ति वा? – आम् ☐ न ☐

स्थानम् –

दिनाङ्कः –

**अभ्यर्थिनः हस्ताक्षरम्**

➢ **अवधेयम् –** अनेन आवेदनपत्रेण सह प्रमाणपत्राणाम् अङ्कपत्राणाम् अनुसंशापत्रादीनां प्रतिकृतयः सर्वथा न प्रेषणीयाः। मौखिकपरीक्षावसरे मूलप्रमाणपत्राणि अङ्कपत्रादीनि आनेतव्यानि।